1

॥ त्रिकालसंध्याप्रारम्भः ॥

श्रीगणेशाय नमः ॥ अथ संध्योपासनविधिः ॥ तत्र सोत्तरीयो बद्धशिखो यज्ञो-
पवीती कृताह्निकः प्राङ्मुखः कुशासने समुपविश्य पञ्चपात्रे वामेन कुशैर्मूर्द्धन्य-
भिषिंचेत् गृहेपात्रस्थजले वामकरस्थजले वा ॐ भूः ॐ भुवः ॐ स्वः ॐ भू-
र्भुवःस्वः इति चतुष्कृत्वा ॐ विष्णुर्विष्णुर्विष्णुः प्रणम्य श्रीकात्यायनमः । प्रणवस्य
ब्रह्मा ऋषिः परमात्मा देवता गायत्री छन्दः संध्याकर्मारंभे विनियोगः पृथ्वीति
॥२॥ मेरुपृष्ठ ऋषिः कूर्मो देवता सुतलं छन्दः आसने विनियोगः ॐ पृथ्वी त्वया धृता ॥२॥
लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥ ॐ उपात्त-
दुरितक्षयाय प्रातः संध्यामहमुपासे ॥ अथावाहनम् ॥ गायत्रीं त्र्यक्षरां बालां साक्ष-
सूत्रकमण्डलुम् ॥ रक्तवस्त्रां चतुर्वक्त्रां हंसवाहनसंस्थिताम् ॥ ब्रह्माणीं ब्रह्मदे-
वत्यां ब्रह्मलोकनिवासिनीम् ॥ आवाहयाम्यहं देवीं गायत्रीं सूर्यमण्डलात्
आगच्छ वरदे देवि त्र्यक्षरे ब्रह्मवादिनि ॥ गायत्रि छन्दसां मातर्ब्रह्मयोने नमोस्तु ते

त्रिकालसंध्या॰
टहती॰

आयफट् अथ प्राणायामः तत्र ओम्यादिकं स्मरेत् प्रणवस्य ब्रह्मा ऋषिः परमात्मा
देवता गायत्री छन्दः सप्तव्याहृतीनां प्रजापति ऋषिः अग्निवायुसूर्यबृहस्प
तिवरुणेन्द्रविश्वेदेवता गायत्र्युष्णिगनुष्टुप् बृहतीपंक्तित्रिष्टुप्जग
त्यश्छन्दांसि तत्सवितुरिति विश्वामित्र ऋषिः सविता देवता गायत्री छ
न्दः प्राणायामे विनियोगः ॐ आपो ज्योतिरिति प्रजापति ऋषिः ब्र
॥२॥ ह्मा अग्निवायुसूर्या देवता आसुरी गायत्री छन्दः प्राणायामे विनियो ॥२॥
गः ॥ ॐ भूर्भुवः स्वरित्यात्मानं परिवेष्ट्य अङ्गुष्ठेन दक्षिणनासापुटं निरुध्य वाम
२ नासापुटेन वायुं ग्रहतोपात् ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः
ॐ सत्यं ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॐ
आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम् इति त्रिः कुर्वन् नाभिदेशे स्थितं
विष्णुं नीलोत्पलदलश्यामं चतुर्भुजं आत्मानं चिन्तयेत् ॥ अङ्गुष्ठानामिका

अथ प्रणवन्यासः ॐ अकारं सत्त्वरूपं नाभ्याम् ॐ उकारं रजोरूपं हृदये ॐ म
कारं तमोरूपं मूर्द्ध्नि ॐ भूः हृदये ॐ भुवः शिरसि ॐ स्वः शिखायाम् ॥ अथ
व्याहृतिन्यासः ॐ गोविन्दाय नमः अङ्गुष्ठयोः ॐ महीधराय नमः तर्ज
न्योः ॐ हृषीकेशाय नमः मध्यमयोः ॐ त्रिविक्रमाय नमः अनामिक
योः ॐ विष्णवे नमः कनिष्ठिकयोः ॐ माधवाय नमः करमध्ये
ॐ जनार्दनाय नमः करयोः पृष्ठे ॥ ततः पादन्यासः ॐ भूः पादयोः ॐ भु
वः जान्वोः ॐ स्वः गुह्ये ॐ महः नाभौ । ॐ जनः हृदये ॐ तपः कण्ठे ॐ
सत्यं भ्रूमध्ये ततोऽङ्गन्यासः ॐ भूरिति हृदयाय नमः ॥ ॐ भुवः इति
शिरसे स्वाहा ॐ स्वरिति शिखायै वषट् ॐ तत्सवितु [illegible] रिति शि
खायाम् ॥ ॐ वरेण्यमिति शिरसि ॐ भर्गो देवस्येति नेत्रयोः ॐ धी
महीति श्रोत्रयोः ॐ धियो यो नः इति कवचाय हुम् ॐ प्रचोदयादित्य

त्रिकालसं०
ध्यापद्धतौ०

आपो हि ष्ठा मयो भुवः। ॐ ता न ऊर्जे दधातन। ॐ महे रणाय चक्षसे। ॐ यो वः शिव
तमो रसः। ॐ तस्य भाजयतेह नः। ॐ उशतीरिव मातरः। ॐ तस्मा अरं गमाम वः।
ॐ यस्य क्षयाय जिन्वथ। ॐ आपो जनयथा च नः। अष्टभिः पदैः शिरोऽभिषि
चेत्। यस्य क्षयाय जिन्वथेति भूमौ क्षिपेत्। अथ चुलुकेन जलमादाय नासि
काग्रे निधाय प्राणायामं कृत्वा निःश्वस्य द्रुपदां जपेत्॥ द्रुपदादिवेति प्राज्यापत्य
॥३॥ श्विसरस्वतीन्द्रा ऋषयः आपो देवता अनुष्टुप् छन्दः जपे विनियोगः। ॐ द्रु ॥३॥
पदादिव मुमुचानः स्विन्नः स्नातो मलादिवः पूतं पवित्रेणेवाज्यमापः शुन्धन्तु
3 मैनसः। तज्जलं शिरसि मार्जयेत्। जलमादाय नासिकाग्रे निधाय। ऋतं च
सत्यं चेत्य घमर्षण ऋषिः भाववृत्तो देवता अनुष्टुप् छन्दः जपे विनियोगः।
ॐ ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत ततो रात्रिरजायत ततः समुद्रो

भ्यां नासापुटद्वयं निरुध्य कुंभकं कुर्य्यात् हृदि ब्रह्माणं कमलासनं रक्तगौरं चतुर्वक्त्रं चिन्त
येत् । रेचके चानामिकाकनिष्ठाभ्यां वामनासापुटं निरुध्य दक्षिणेन वायुं विरेच
येत् ॥ रेचके ललाटस्थं महेश्वरं त्रिनेत्रं शुद्धस्फटिकसंकाशं निर्मलं पाप
नाशं चिन्तयेत् ॥ एवं त्रिराभ्यसेत् । ततश्चाचमनम् । ॐ सूर्य्यश्चमेति ना
रायण ऋषिः सूर्य्यो देवता त्रिष्टुप् छन्दः आचमने विनियोगः ॐ
सूर्य्यश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्तां
यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदव
लुंपतु । यत्किंचिद्दुरितं मयि इदं माममृतयोनौ सूर्य्ये ज्योतिषि जुहोमि स्वाहा
हिः स्मार्त्तमाचमनं कुर्य्यात् ततो मार्जनम् ॥ आपो हि ष्ठेति तिसृणां
सिन्धुद्वीप ऋषिः आपो देवता गायत्री छन्दः मार्जने विनियोगः ॐ

4

स्वांजलिकं कृत्वा सूर्यमुपतिष्ठते ॥ उद्वयमिति हिरण्यस्तूप ऋषिः सूर्यो देवतानुष्टुप्
छन्दः सूर्योपस्थाने विनियोगः ॐ उद्वयं तमसस्परि स्वः पश्यन्त उत्तरं देवं देवत्रा
सूर्यमगन्म ज्योतिरुत्तमम् ॥ उदुत्यमिति ॥ प्रस्कण्व ऋषिः सूर्यो देवता गायत्री
छन्दः सूर्योपस्थाने विनियोगः ॐ उदुत्यं जातवेदसं देवं वहन्ति केतवः दृशे
विश्वाय सूर्यम् ॥ चित्रमित्यस्य कौत्स ऋषिः सूर्यो देवता त्रिष्टुप् छन्दः
सूर्योपस्थाने विनियोगः ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्र ॥५॥
॥५॥ स्य वरुणस्याग्नेः आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थु
षश्च तच्चक्षुरिति दध्यङ्ङाथर्वण ऋषिरक्षरातीतः सूर्यो देवता पुर उष्णि
क् छन्दः सूर्योपस्थाने विनियोगः ॥ ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमु
च्चरत् पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं प्र
ब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥

अर्णवः समुद्रादर्णवादधि संवत्सरो अजायत अहोरात्राणि विदधद्विश्व
स्य मिषतो वशी सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् दिवं च पृथिवीं चान्त
रिक्षम् अथो स्वः ॥ ततो जलं भूमौ क्षिपेत् ततः आचमनम् ॥ अन्तश्चरसीति ति
रश्चीन ऋषिः आपो देवता अनुष्टुप् छन्दः आचमने विनियोगः ॐ अन्त
श्चरसि भूतेषु गुहायां विश्वतो मुखः ॥ त्वं यज्ञस्त्वं वषट्कार आपो ज्योती र
सोऽमृतम् ॥ इत्याचम्य स्मार्तमाचमनं कुर्यात् ॥ सूर्याञ्जलिं दद्यात् ॥ प्रणवस्य ब्रह्मा
ऋषिः परमात्मा देवता गायत्री छन्दः व्याहृतीनां प्रजापति ऋषिः गायत्र्युष्णिग
भ:८ नुष्टुप् छन्दांस्यग्निवायुसूर्या देवताः तत्सवितुरिति विश्वामित्र ऋषिः सविता
देवता गायत्री छन्दः सूर्याञ्जलिदाने विनियोगः ॐ भूर्भुवः स्वः तत्सवितु
र्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् इति सपुष्पं जलं सूर्या
ञ्जलीकृत्योर्ध्वं त्रिः क्षिपेत् ॥ ततः प्रदक्षिणां स्वपीठे उपस्थाय हस्ताभ्यां

शिरसि । भर्गो देवस्येति नेत्रयोः । धीमहीति श्रोत्रयोः । धियो यो नइति कव
चायहुम् ॥ प्रचोदयादस्त्राय फट् ॥ महामुद्रायै नमः प्रणवस्य ब्रह्मा ऋषिः
परमात्मा देवता गायत्री छन्दः ॥ व्याहृतीनां प्रजापतिऋषिः । गायत्र्युष्णि
गनुष्टुभश्छन्दांसि अग्निवायुसूर्या देवता तत्सवितुरिति विश्वामि
॥५॥ त्र ऋषिः सविता देवता गायत्री छन्दः जपे विनियोगः प्रातः प्राङ्मुखः म ॥५॥
ध्याह्ने सूर्याभिमुखः सायं पश्चिमाभिमुखः उपविश्य उक्तजपविधि
5 ना गायत्रीं जपेत् जपस्वरूपम् । ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य
धीमहि धियो यो नः प्रचोदयात् ॥ सुरभिर्ज्ञानवैराग्यं योनिः शंखः कुमुद पंक
जम् ॥ लिंगं निर्वाणमुद्राश्च जपान्ते चाष्टमिद्रूपः ॥ ॐ नारायणाय
विद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात् ॥ अहो महान् वह

इत्युपस्थाय ॥ श्वेतवर्णा समुद्दिष्टा कौशेयवसना तथा ॥ श्वेतानुलेपनैः पु
ष्पैरलंकारैश्च भूषिता ॥ आदित्यमण्डलस्था च ब्रह्मलोकगताथवा ॥
अक्षसूत्रधरा देवी पद्मासनगता शुभा ॥ आवाहयेत् जुषाणेन तेजोसीति वि
धानतः ॥ तेजोसीति परमेष्ठी परमेष्ठी ऋषिः आज्यं देवता यजुः गायत्र्यावा
हने विनियोगः ॐ तेजोसि शुक्रममृतमसि धामनामासि प्रियं देवानामनाधृष्टं
देवयजनमसीति गायत्रीमावाह्य ॥ तुरीयपदस्य विमल ऋषिः परमात्मा दे
वता गायत्री छन्दः गायत्र्युपस्थाने विनियोगः ॥ गायत्र्यस्येकपदी द्विपदी
त्रिपदी चतुष्पद्यपदसि न हि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोर
जसे सावदोमा प्रापदोम् ॥ इत्युपस्थाय ॥ ॐ भूः हृदयाय नमः ॐ भुवः शि
रसे स्वाहा ॐ स्वः शिखायै वषट् ॥ ॐ तत्सवितुरिति शिखायाम् ॥ वरेण्य

सावित्रीं युवतीं शुक्लां शुक्लवस्त्रां त्रिलोचनाम् ॥ त्रिशूलहस्तां च वृषारूढां रुद्राणीं रुद्र-
देवताम् ॥ यजुर्वेदकृतोत्संगां जटामुकुटमण्डिताम् ॥ कैलाशविहितावासां मा-
पालीं सूर्यमण्डलात् ॥ वरदां अक्षरां साक्षां देवीमावाहयाम्यहम् ॥ आगच्छ व-
रदे देवि त्र्यक्षरे रुद्रवादिनि ॥ सावित्रि छन्दसां माता रुद्रयोनि नमोऽस्तु ते ॥ अथा-
चमनम् ॥ आपः पुनन्त्विति मारीचः काश्यप ऋषिः आपो देवता अनुष्टुप्
6
॥६॥ छन्दः आचमने विनियोगः ॥ ॐ आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु ॥६॥
तु माम् ॥ पुनन्तु ब्रह्मणस्पतिर्ब्रह्म पूता पुनातु माम् ॥ यदुच्छिष्टमभोज्यं
च यद्वा दुश्चरितं मम सर्वं पुनन्तु मामापो असतां च प्रतिग्रहं स्वाहा ॥
मध्याह्नसंध्यांगभूतेन एतद्गायत्रीजपेन रुद्रस्वरूपी सूर्यः प्रीयताम् ॥
॥ अथ सायंसंध्याविधिः ॥ उपात्तदुरितक्षयाय सायंसंध्यामहमुपासे

रूपिणा अक्षरे अमरे चैव ब्रह्मयोने नमोस्तुते ॥ गायत्रि वशिष्ठ शापाद्वि

मुक्ता भव ॥ एवं यथाशक्तिं जपित्वादित्यमुपतिष्ठते ॥ विभ्राडसप्र

गार्चः पुरुषसूक्तं षोडशर्चं शिवसंकल्पं पठित्वा मतूजिष सप्त ब्राह्मणां त्रयोवि

शतिकण्डिकाः परि त्वा चोपस्थाय ॥ विश्वतश्चक्षुरिति विश्वकर्मा भौमन ऋषिः

सूर्यो देवता त्रिष्टुप् छन्दः आचमने विनियोगः ॥ ॐ विश्वतश्चक्षुरुत विश्वतोमुखो

विश्वतो बाहुरुत विश्वतस्पात् संबाहुभ्यां धमति संपतत्रै द्यावाभूमी जनयन्देव

एकः ॥ देवा गातुविदिति मनस्पति ऋषिः वातो देवता विराट् छन्दः विसर्जने विनि

योगः ॐ देवा गातुविदो गातुं वित्त्वा गातुमित मनसस्पत इमं देव यज्ञं स्वाहा

वाते धाः इति विसृज्य प्रातः संध्यांगभूतेन एतद्गायत्रीजपेन ब्रह्मस्वरूपी सू

र्यः प्रीयतामु ॥ एवं जपं निवेद्य द्विराचमेत् इति प्रातः संध्या ॥ अथ मध्याह्ने

सन्ध्याविशेषः ॥ उपानदुरितं क्षयाय मध्याह्ने संध्यामहमुपासे ॥ आवाहनं

7

श्रीगणेशाय नमः॥ वामे वह्न्कुशान् दक्षिणे पाणौ पवित्रं कु
शत्रयं च धृत्वा सप्रणवगायत्र्या शिखां बध्वा ऐशान्याभिमु
ख आचम्य ओं इत्यादिना जलमभिमन्त्र्य पुनरा० वा
मेन ततो वारिणात्मानं वेष्टयित्वा० सप्रणवगायत्र्या र
क्षां कुर्यात् ततः ॐकारस्य ब्रह्मा ऋषिर्गायत्री छन्दो
ऽग्निर्देवता शुक्लो वर्णः सर्वकर्मारम्भे विनियोगः। ॐ स
प्त व्याहृतीनां प्रजापति ऋषिर्गायत्र्युष्णिगनुष्टुब्बृहती
पंक्ति त्रिष्टुब्जगत्यश्छन्दांस्यग्निवाय्वादित्यबृहस्पति
वरुणेन्द्रविश्वेदेवा देवता अनादिष्टप्रायश्चित्ते प्राणाया

त्रि॰ का॰सं॰ संध्या॰

देवीत्रिनयनं दिव्यं ध्यायेत्॥ त्रिष्वप्येतेषु प्रत्येकं त्रिमन्त्राभ्यासः

प्रत्येकमोंकारादि सप्तव्याहृत्यः। ओंकारादिनाविनी ओंकार

वपन व्यस्यं शिरस्वेति मंत्रः॥ नस्यत्वन्यसम्। ओं भूः ओं भुवः

ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यं ओं तत्सवितुर्वरेण्यं

भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्। ओं आपो

ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्। ओं सूर्यश्चमेति ब्र २

ह्मा ऋषिः प्रकृतिश्छन्दः सूर्यो देवता अपामुपस्पर्शने विनि

योगः ओं सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः

पापेभ्यो रक्षन्ताम् यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां

मे विनियोगः ॐ गायत्र्या विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवताग्निमुखमुपनयने प्राणायामे विनियोगः ॥ ॐ शिरसः प्रजापति ऋषिस्त्रिपदा गायत्री छन्दो ब्रह्माग्नि वायु सूर्या देवता प्राणायामे विनियोगः इति ऋष्यादिकं स्मृत्वा० बद्धासनः संमीलितनयनो मौनी प्राणायामत्रयं कुर्यात्० तत्र वायोरादानकाले पूरकनामा प्राणायामः ० तत्र श्यामं चतुर्भुजं विष्णुं नाभौ ध्यायेत् ॥ धारणाकाले कुम्भकः ॥ तत्र कमलासनं रक्तवर्णं चतुर्भुजं चतुर्मुखं ब्रह्माणं हृदये ध्यायेत् ॥ त्यागकाले रेचकः तत्र श्वेतं ललाप

त्रिकाल सं०
संध्या०

केवलवैदिक०

तेभ्यः पापेभ्यो रक्षन्तां यदह्ना पापमकार्षं मनसा वाचा
हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अहस्तदवलुम्पतु यत्किंचि
दुरितं मयि इदमहममृतयोनौ सत्ये ज्योतिषि जुहोमि
१ स्वाहा इत्यनेनाप आचामेत् ॐ आपोहि ष्ठेत्यादि
ऋचस्तिसृभिः पदैः शिरसि अष्टमेन भूमौ नवमेना
३ पि शिरसि कुशत्रयेण जलं क्षिपेत् इदमेव मार्जनं ३
ॐ आपो हि ष्ठेत्यादि ऋचस्य सिन्धुद्वीप ऋषि गायत्री
छन्द आपो देवता मार्जने विनियोगः ॐ आपो
हि ष्ठा मयोभुवः १ ॐ ता न ऊर्जे दधातन २ ॐ

पभ्यामुदरेणा शिश्ना रात्रिस्तदवलुंपतु यत्किंचिद्दुरितं मयि
इदमहममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा इति प्रातरा
चामेत्। आपः पुनन्त्विति विष्णुऋषिरनुष्टुप्छन्दः आपो
देवता अपामुपस्पर्शने विनियोगः॥ ॐ आपः पुनन्तु पृ
थिवीं पृथिवी पूता पुनातु माम्॥ यदुच्छिष्टमभोज्यं य
द्वा दुश्चरितं मम सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहं
स्वाहा इति मध्याह्ने आचामेत्॥ अग्निश्च मेति रुद्र
ऋषिः प्रकृतिश्छन्दोऽग्निर्देवता अपामुपस्पर्शने विनि
योगः ॐ अग्निश्च मा मन्युश्च मन्युपतयश्च मन्यु

भावस्थ्यं देवतं अश्वमेधावभृथे विनियोगः ॐ ऋतं च सत्यं
चाभीद्धात्तपसोऽध्यजायत ततो रात्र्यजायत ततः समुद्रोऽर्णवः
10 समुद्रादर्णवादधि संवत्सरोऽजायत अहोरात्राणि विदधद्वि
श्वस्य मिषतो वशी सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पय ल्पय
॥५॥ त् दिवं च पृथिवीं चान्तरिक्षमथो स्वः ततोऽन्तश्चरसी
ति तिरश्चीन ऋषिरनुष्टुप्छन्दः अपामुपस्पर्शने विनि ॥६॥
योगः ॐ अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः त्वं य
ज्ञस्त्वं वषट्कार आपो ज्योती रसोऽमृतम् इत्यनेन आचा
मेत् ततः प्राणायाम ॐ भूर्भुवः स्वरिति गायत्र्या प्रणवमिश्र

महेश्वराय पवन्तसे ३ ॐ यो वः शिवतमो रसः ४ ॐ तस्य भाजयतेह नः ५ ॐ उशतीरिव मातरः ६ ॐ तस्मा अरंगमाम वः ७ ॐ यस्य क्षयाय जिन्वथ ८ ॐ आपो जनयथा च नः ९ ततः ... मादाय वारत्रयं द्रुपदापाठेन ... शिरसि क्षिपेत् द्रुपदादिवेति कोकिलो राजपुत्र ऋषिरनुष्टुप् छन्दः आपो देवता सौ... त्रामन्यग्रस्थे विनियोगः ॐ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ततः करस्थ जलं नासाग्रे संयोज्य पापपुरुषं ... त्रिः सकृद् वा अघमर्षणं जपेत् ॐ अघमर्षण सूक्तस्याघमर्षण ऋषिरनुष्टुप् छन्दो

कवचवारक

चक्षुर्मित्रस्यवरुणस्याग्नेः आप्रा द्यावापृथिवी अन्तरिक्षं
सूर्यआत्माजगतस्तस्थुषश्च ॐ तच्चक्षुरित्यस्य वसिष्ठ
ऋषि [illegible] स्तरागीतिवपुर उष्णिक्छन्दः सूर्यो दे
11 वता सूर्योपस्थाने विनियोगः ॐ तच्चक्षुर्देवहितं पुरस्ता
च्छुक्रमुच्चरत पश्येम शरदः शतं जीवेम शरदः शतं शृ ॥५॥
॥५॥ णुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शर
दः शतं भूयश्च शरदः शतात् ॐ मूर्तिरूपाय नमः ॐ भु
वः शिरसे स्वाहा ॐ स्वः शिखायै वषट् ॐ स्वः कवचाय
हुं ॐ भूर्भुवः स्वः नेत्राभ्यां वौषट् ॐ भूर्भुवः स्वः अस्त्राय फट्

अर्घ्याञ्जलीन् सूर्याभिमुखं क्षिपेत् ततो भूमिसंलग्नगुल्फतो
लभागो वा भूमिलग्नैकचरणो वा प्रातःसायं कृताञ्जलिम
ध्यान्हे ऊर्ध्वबाहुः सूर्यमुपतिष्ठेत् एभिर्मन्त्रैः ॐ उद्वयमि
त्यस्य हिरण्यस्तूप ऋषिर्गायत्री छन्दः सूर्योपस्थाने विनि
योगः ॐ उद्वयन्तमसस्परि स्वः पश्यन्त उत्तरं देवं देवत्रा
सूर्यमगन्म ज्योतिरुत्तमम् ॐ उदुत्यमिति प्रस्कण्व ऋ
षिर्गायत्री छन्दः सूर्यो देवता सूर्योपस्थाने विनियोगः
ॐ उदुत्यं जातवेदसं देवं वहन्ति केतवः दृशे विश्वाय सूर्यं ॐ
चित्रमित्यस्य कौत्स ऋषिस्त्रिष्टुप् छन्दः सूर्यो देवता सू
र्योपस्थाने विनियोगः ॐ चित्रं देवानामुदगादनीकं

न्दोगायत्र्यावाहने विनियोगः ॐ तेजोऽसि शुक्रमस्यमृतमसि धाम
नामासि प्रियं देवानाम नाधृष्टं देवयजनमसि [illegible] ॐ गाय
त्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि नहि पद्यसे नमस्ते तुरी
12 याय दर्शताय पदाय परो रजसे ॐ सावदोमा प्रापदोम् इत्युपस्थाय ॥६॥
प्रातः प्राङ्मु[illegible]खो मध्याह्ने सूर्याभिमुखस्तिष्ठन् सायं पश्चिमाभि
॥५॥ मुख उपविश्य [illegible] जपादि विना गायत्रीं जपेत् जाप्यमन्त्रः
ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः
प्रचोदयात् ॐ । ततः प्रदक्षिणीकृत्य विसर्जयेत् गुरवे नमः ।
इति त्रिकालसंध्या समाप्ता शुभमस्तु शुभं भूयात्॥

इत्येकानि चिरावृत्य पूर्वोक्तं आख्यादिकं [illegible] स्मृत्वा पूर्वोक्त
रूपां गायत्रीं ध्यात्वा ॐ कारस्य ब्रह्मा ऋषि गायत्री छन्दोऽग्निर्देवता शु
क्लो वर्णः सर्वकर्मारम्भे विनियोगः ॐ भूर्भुवः स्वरिति प्रजापतिः ऋ
षिर्गायत्री छन्दोऽग्निर्देवता शुक्लो वर्णः सर्वकर्मारम्भे विनियोगः
ॐ भूर्भुवः स्वरिति प्रजापति ऋषिर्गायत्र्यु [illegible] ष्णिगनुष्टुप् छन्दांसि अ
ग्निवाय्वादित्या देवता जपे विनियोगः गायत्र्या विश्वामित्र ऋषिर्गा
यत्री छन्दः सविता देवता जप विनियोगः श्वेतवर्णा समुद्दिष्टा कौशे
य वसनात्तथा [illegible] श्वेतैर्विलेपनैर्माल्यैरलंकारैश्च [illegible] भूषिता १
आदित्यमण्डलान्तस्था ब्रह्मलोकगतापि वा अक्षसूत्रधरा देवी
पद्मासनगता शुभा तेजोसीति देवा ऋषयः शुक्रं देवता गायत्री छ

आवाहनम् ॥ ॐ सरस्वतीं कलसां पीनवक्षां चतुर्भुजाम् ॥ शंख चक्र गदा पद्म हस्तां
गरुडवाहनाम् ॥ वर्षाश्रमवासां तामायान्तीं सूर्यमण्डलात् ॥ सामवेद कृतोत्सं
गां वनमालाविभूषिताम् ॥ वैष्णवीं अक्षरां साक्षां देवीमावाहयाम्यहम् ॥ आ
गच्छ वरदे देवि त्र्यक्षरे विष्णुवादिनि ॥ सरस्वति छन्दसां मातर्विष्णुयोने नमोऽस्तु
23 ते ॥ आचमनम् अग्निश्चमेति नारायण ऋषिः अग्निर्देवता अनुष्टुप् छन्दः
॥१॥ आचमने विनियोगः ॐ अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापे ॥१॥
भ्यो रक्षन्तां यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना
अहस्तदवलुम्पतु ॥ यत्किंचिदुरितं मयि इदमहं मां अमृतयोनौ सत्ये ज्योतिषि जु
होमि स्वाहा ॥ जपो जपि मया संध्यांगभूतेन यथा संख्याकेन गायत्रीज
पेन विष्णुस्वरूपी सूर्यः प्रीयताम् अनेन सर्वं पूर्वाह्नवत् इति संध्याजपम् ॥

• त्रिकालसंध्या रहनी समाप्ता •